International Research Journal of Humanities, Language and Literature
ISSN: (2394-1642)
Impact Factor 6.972 Volume 10, Issue 3, March 2023
Association of Academic Researchers and Faculties (AARF)
Website-www.aarf.asia, Email : editor@aarf.asia , editoraarf@gmail.com

**श्री परमात्मने नमः**

# भारतीयसंस्कृतेः प्रमुखाः विशेषताः

**डॉ. राजेन्द्र कुमारः**
**सह आचार्यः (संस्कृत) राजकीय महाविद्यालयः ऊना**
**हिमाचल प्रदेशः।**

**सत्याहिंसा गुणैः श्रेष्ठा, विश्वबन्धुत्व शिक्षिका।**
**विश्वशान्ति सुखाधात्री, भारतीया हि संस्कृतिः।**

## का नाम संस्कृतिः?

भारतीय संस्कृतेर्विवृति विचारे वहवोऽनुयोगाः समापतन्ति चेतसि यत् का नाम संस्कृतिः? संस्कृत व्याकरण अनुसारेण **सम् उपसर्ग पूर्वकात् कृ धातोः क्तिन् प्रत्यये कृते संस्कृतिः शब्दः निष्पद्यते।** शिष्ट-पुरुषैर्महापुरुषैश्चारिता सम्यक् कृतिः संस्कृतिरुच्यते। आधुनिक काले अयं शब्दः यस्मिन् अर्थे प्रयुज्यते संस्कृत साहित्ये तस्मिन् अर्थे संस्कार शब्दस्य प्रयोगः भवति स्मः। सामान्यतया मानव समुदायस्य परम्परानुसारेन प्राप्तानां संस्काराणां समष्टिः एव संस्कृतिः इति कथयितुं शक्यते। अन्तःकरणं संस्कारो यथा क्रियते सा संस्कृतिः कथ्यते। संसारेऽस्मिन् अद्यत्वे या काश्चिदपि संस्कृतयः उपलभयन्ते तासु सर्वासु संस्कृतिषु भारतीय संस्कृतिः प्राचीनतमा इति निर्विवादं तथ्यम्। अस्याः प्राचीनतायाः उद्घोषणा वेदेष्वपि कृताः **"सा प्रथमा संस्कृतिः विश्व वारा"**

**संस्कृतिः** कस्यचित् अपि देशस्य आत्मा भवति। ताम् बिना समृद्धः अपि देशः मृतः तिष्ठति। सा नाम संस्कृतिः या मनसः मलं, चांचल्यं, आत्मनश्च अज्ञानावरणं व्यपनयति। संस्कृति एव चेतः प्रसादयति, चेतसि स्थैर्यं संस्थापयति, दुर्भावान् दमयते, दुःख द्वन्द्वानि दहति, ज्ञान ज्योतिः प्रज्वालयति, अविद्यातमः अपहनन्ति, भूतिं भावयति, सुखं साधयति, धृतिं धारयति, राष्ट्रस्य सम्पूर्ण मानव जातेः च उपकरोति। प्राचीन महर्षिणामपि एवम् उद्घोषः -

**कृण्वन्तो विश्वम् आर्यम्।**

भारतीया संस्कृतिः विश्वस्य पथ प्रदर्शका अस्ति

यथोक्तं च आचार्य मनुना-

**एतद् देश प्रसूतस्य सकाशाद्ग्रजन्मनः।**
**स्वं-स्वं चरित्र शिक्षेरन् पृथ्विव्यां सर्वमानवाः।। 1**

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

भारतीया संस्कृतिः अन्यासु सर्वासु विश्व संस्कृतिषु प्राचरनतमा सर्वश्रेष्ठा चास्ति। **समन्वयं भावना** अस्याः संस्कृतेः प्रमुखा विशेषता अस्ति। यथाः-

**संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे सञ्जानाना उपासते।। 2**

- विश्वकल्याण भावना, सर्वभूत हित भावना भारतीय संस्कृतेः अद्वितीया विशेषता अस्ति। यथाः-

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पयश्न्तु मा कश्चिद् दःखभाग्भवेत।। 3**

- **भारतीयसंस्कृतेः वैशिष्ट्यम्**

भारतीय संस्कृतेः प्रमुखाः विशेषता अत्र प्रस्तूयन्ते :-

**1 धर्मप्राधान्यम्**

अस्माकं भातीय संस्कृतेः प्रमुख वैशिष्ट्यं धर्म प्राधान्यं अस्ति।

**धारणाद् धर्म इत्याहुः।**

**यतोऽभ्युदयनिःश्रेयस् सिद्धिः स धर्मः।** इत्यस्ति धर्मस्य लक्षणम्। भारतवर्षः धार्मिक दृष्टया सांसकृतिक दृष्ट्या च सम्पूर्ण जगतः पथ प्रदर्शकः इति **मनुर्भगवान् निजगाद्।** संस्कृत साहित्ये ''वसुधैव कुटुम्बकम्'' इत्येषा उदारा धर्मभावना विलसति। यथाः-

**अयं निजः परोवेति गणना लघु चेतसाम्।**
**उदार चरितानां तु वसुधैण कुटुम्बकम्।।4**

अन्येऽपि धर्मसम्बन्धी श्लोकाः सन्तिः -

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।**
**आचारश्चैव साधुनामात्मनः तुष्टिरेव च।।5**
**वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
**एतच्चतुर्विधं प्राहुः साक्षात्धर्मस्य लक्षणम्।।6**
**अर्थ कामेष्वसक्तानां धर्मज्ञानं विधीयते।**
**धर्म जिज्ञासमानानां प्रमाणं परमं श्रुतिः।।**

**2 आध्यात्मिकी भावना**

आध्यात्मिकी भावना अस्याः संस्कृतेः प्रमुख भावना अस्ति। जीवनम् एतत् न केवलं भोगार्थमेव अपितु आत्म उन्नतेः प्रमुखं साधनम्। आध्यात्मिकी भावना मानवं देवत्वं प्रापयति। सः सर्वेषु अपि जीवेषु एकत्वं पश्यति। इदं जगत् परमात्मना व्याप्तम्। यथा चोक्तम् ईशावास्योपनिषदे :-

**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।।7**

3 **सत्यपरिपालनम्**

सत्य परिपालनं भारतीयसंस्कृतेः महती विशिष्टता। मनसा वाचा कर्मणा सत्यमुररीकुर्याद् अनुतिष्ठेच्च। सर्वदा सत्यं व्यवहरेत्, नासत्यम्। यथोक्तं च मुण्डकोपनिषदेः -

**सत्यमेव जयते।8**

तैत्तिरीयोपनिषदेऽपि कथितम् -

**सत्यं वद् धर्मंचर।**

© Association of Academic Researchers and Faculties (AARF)

भारतीयसंस्कृतेः ईश्वरमपि सत्य स्वरूपं मन्यते।

यथोक्तं च बाल्मीकि रामायणेः -

**सत्येमेवेश्वरो लोके, सत्ये धर्मः सदाऽऽश्रितः।**
**सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम्।।9**
**दत्तमिष्टं हुतं चैव तप्तानि च तपांसि च।**
**वेदाः सत्यप्रतिष्ठानास्तस्मात्सत्य परो भवेत।।10**

आचार्यः चाणक्येनापि उक्तम्ः -

**सत्येन धार्यते पृथ्वी सत्येन तपते रविः।**
**सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्।।**

ऋग्वेदेऽपि कथितम्ः-

**ऋतस्य पन्था न तरन्ति दूष्कृतः। 11**
**सुगा ऋतस्य पन्थाः। 12**

यजुर्वेदेऽपि कथितम्ः-

**ऋतस्य पथाप्रेत।**

महर्षि वेदव्यासेनापि महाभारते कथितम् -

**सत्येमेकपदं स्वर्गयम्।**

एतानि आदर्श वाक्यानि भारतीयासंस्कृतेः निहितं सत्यस्य महिमां दर्शयन्ति।

## (4) <u>कर्मवादः</u>

कर्मवादः अपि भारतीय - संस्कृतेः विलक्षण विशिष्टता अस्ति। मनुष्येण सदाऽनासक्ति भावनया कर्म कार्यमिति। कृतस्य कर्मणः फलप्राप्तिः सुनिश्चिता। सत्कर्मणा पुण्यं, दुष्कर्मणा पापं च आप्नोति। निष्काम कर्मभावना भारतीय संस्कृतेर्महती विशेषता।

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**
**मा कर्म फल हेतुर्भूमा ते संङ्गोऽस्त्वकर्मणि।।13**

उद्यमेनेव हि सिध्यन्ति कार्याणिः-

**उद्यमेनेव हि सिध्यन्ति कार्याणि न तु मनोरथैः।**
**न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।।**

## (5) <u>नारी सम्मानः</u>

नारी सम्मानः भारतीय संस्कृतेः प्रमुखा विशेषता। नारी भारतीयसंस्कृतौ सर्वाधिक गौरवपूर्णमास्पदं भजते, यथा स्वयं महर्षिणा मनुनापि उक्तम्ः-

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैस्तास्तु न पूज्यन्ते सर्वास्तत्राफला क्रिया ः।।**

## (6) <u>परोपकारः</u>

परोपकारः अपि भारतीय संस्कृतेः विशिष्टता। यथाचोक्तं वेदव्यासेनः-

**अष्टादश पुराणेषु व्यासस्य वचनद्वयम्।**
**परोपकारः पुण्याय पापाय परपीडनम्।।**

© **Association of Academic Researchers and Faculties (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

अपि च -

**परोपकाराय फलन्ति वृक्षाः**
**परोपकाराय बहन्ति नद्यः।**
**परोपकाराय दुहन्ति गावः**
**परोपकारार्थमिदं शरीरम्।।**

(7) **मातृ-पितृ गुरु-भक्ति**

मातृ देवो भव, पितृ देवो भव, आचार्यः देवो भव, अतिथि देवो भव, इत्येषां देववत् पूज्यत्वमाख्यायते। मातृ-पितृ-गुरू-अतिथिनां पूजा शास्त्रेषु सम्यक् निर्दिष्टा। त्रयाणामेषा पूजा परमो धर्मः कथितम् यथाः-

**माता पित्रो गुरुणाञ्च पूजा बहुमता मम्।**
**इह युक्तो नरो लोकान् यशश्च महदश्नुते।।**

(8) **पुनर्जन्मवादः**

कर्मानुरूपं सर्वस्यापि जन्तोः पुनर्जन्म भवति। यथाचोक्तं गीतायाम् :-

**जातस्य हि ध्रुवो मृत्यु ध्रुवं जन्म मृतस्य च।**
**तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि।।14**

अर्थात् यो हि जायते तस्य मरणं ध्रुवमेवास्ति। मृतस्य च कर्मानुसारं पुनर्जन्म सुनिश्चितम्। यः पूर्व जन्मनि यादृशं कर्म कुरुते, सोऽस्मिन् जन्मनि तादृशे एव कुले जन्म लभते।

(9) **तपोमयं जीवनम्**

तपोमयं जीवन यापनं भारतीयसंस्कृतेः विलक्षण विशिष्टता। तपसैव शुद्धयति जीवनम्, मनश्च प्रसीदति। भोग वासनाभिविर्षादति स्वान्तमू। मनसो बुद्धयाश्च परिष्काराय सततं तपोमयं जीवनं यापयेत।

(10) **यज्ञस्य महत्त्वम्**

यज्ञस्य महत्त्वमपि भारतीय संस्कृतेः विशिष्टता। सर्वैः जनैः, पञ्च यज्ञाः दैनिक कर्तव्यत्त्वेनानुष्ठेयाः। यज्ञानुष्ठानेन आत्म प्रसादनं देव प्रसादनं चोभयं क्रियते। पञ्च यज्ञाः सन्तिः-

**1. देव यज्ञः** **2. पितृ यज्ञः** **3. ब्रह्म यज्ञः**
**4. बलिवैश्व देव यज्ञः** **5. अतिथि यज्ञः।**

(11) **जन्म भूमि स्नेहः**

जननी - जन्म भूमि स्नेहः अपि भारतीयसंस्कृतेः विशिष्टता । यथाः-

**अपि स्वर्णमयी लंका न मे लक्ष्मण रोचते।**
**जननी जन्मभूमिश्च स्वर्गीदपि गरीयसी।।**

(12) **भातृ स्नेहः**

भातृ स्नेहः अपि भारतीयसंस्कृतेः विशेषता अस्ति। यथा :-

**देशे-देशे कलत्राणि देशे-देशे च बान्धवाः।**
**तं तु देशं न पश्यामि यत्र भ्राता सहोदरः।।**

**© Association of Academic Researchers and Faculties (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

**निष्कर्षः**

संस्कृतिरेव कस्यापि मानव समाजस्य देशस्य वामूल्यो निधिर्भवति। धर्मोदर्शनं, साहित्यं संगीतं, कला, सत्यनिष्ठा, भक्तिः, अहिंसा पालनमादयः भारतीय-संस्कृतेः प्रमुख गुणाः सन्ति। अपि च विविधा दुर्लभा गुणा अत्रैकी भूता दृश्यन्ते येषामनुकरण विषये सर्वे विद्वासः एकमता दृश्यन्ते। एतै गुणैः विहीनो मानवो नैव मानवरूपेण गण्यतेऽपितु पशुरेव सः। थयोक्तम्ः-

**साहित्य संगीत कला विहीनः**
**साक्षात्पशुः पुच्छविषाण हीनः।**
**तृणं न खादन्नपि जीवमानः,**
**तद्भागधेयं परमं पशूनाम्।।**

चत्वारः वेदाः, षड् शास्त्राणि, स्मृतिः ग्रन्थाः पुराणानि च भारतीय संस्कृते आधार ग्रन्थाः मन्यन्ते। भारतीय संस्कृतौ सदाचरणम् एव प्रधानम्, मतवादः तु सर्वथा गौणः। एतस्याम् संस्कृतौ ईश्वर भक्ति, शुभाचरणम्, सरलत्वम्, यज्ञ भावना सहयोग सहायता च निहिताः सन्ति। एषः प्रभाव अत्रत्यायाः संस्कृते एव यत् देवा अपि अत्र जन्म लब्धुं कामयन्तेः-

**गायन्ति देवा कुलगीतिकानि,**
**धन्यास्तु ते भारत भूमि भागे।**
**स्वर्गापवर्गास्पदमार्गभूते,**
**भवन्ति भूयः पुरुषाः सुरत्वात्।।**

अतः अस्माभिः सर्वाभिः स्व संस्कृतिं सदैव
रक्षणीयं तथा अस्याः प्रचारः प्रसारश्च करणीयम्।

**जयतु संस्कृतम्**
**जयतु भारतम्**
**जयतु हिमाचलम्**
**जयतु भारतीयसंस्कृतिः।**

**© Association of Academic Researchers and Faculties (AARF)**

**संदर्भः**

1. मनुस्मृति- अध्याय 2-20
2. ऋृग्वेद 10.91
3. तैत्तिरीयोपनिषद्
4. पञ्चतन्त्र
5. मनुस्मृति 2.6
6. मनुस्मृति 2.12
7. ईशावास्योपनिषद्
8. मुण्डकोपनिषद् 3.1.6
9. बाल्मीकि रामायण, अयोध्याकाण्ड
10. बाल्मीकि रामायण, अयोध्याकाण्ड
11. ऋग्वेद 9.73.6
12. ऋग्वेद 8.31.13
13. गीता 2.47
14. गीता 2.27